उच्छिष्ट गणपति स्तोत्रं

उच्छिष्ट गणपति स्तोत्रं

देव्युवाच |
नमामि देवं सकलार्थदं तं
सुवर्णवर्णं भुजगोपवीतं |
गजाननं भास्करमेकदंतं
लंबोदरं वारिभवासनं च ||1||

केयूरिणं हारकिरीटजुष्टं
चतुर्भुजं पाशवराभयानि |
सृणिं च हस्तं गणपं त्रिनेत्रं
सचामरस्त्रीयुगलेन युक्तं ||2||

षडक्षरात्मानमनल्पभूषं
मुनीश्वरैर्भार्गवपूर्वकैश्च |
संसेवितं देवमनाथकल्पं
रूपं मनोज्ञं शरणं प्रपद्ये ||3||

वेदांतवेद्यं जगतामधीशं
देवादिवंद्यं सुकृतैकगम्यं |
स्तंबेरमास्यं ननु चंद्रचूडं
विनायकं तं शरणं प्रपद्ये ||4||

भवाख्यदावानलदह्यमानं
भक्तं स्वकीयं परिषिंचते यः |
गंडस्रुतांभोभिरनन्यतुल्यं
वंदे गणेशं च तमोऽरिनेत्रं ||5||

शिवस्य मौलाववलोक्य चंद्रं
सुशुंडया मुग्धतया स्वकीयं |
भग्नं विषाणं परिभाव्य चित्ते
आकृष्टचंद्रो गणपोऽवतान्नः ||6||

पितुर्जटाजूटतटे सदैव
भागीरथी तत्र कुतूहलेन |
विहर्तुकामः स महीध्रपुत्र्या
निवारितः पातु सदा गजास्यः ||7||

लंबोदरो देवकुमारसंघैः
क्रीडन्कुमारं जितवान्निजेन |
करेण चोत्तोल्य ननर्त रम्यं
दंतावलास्यो भयतः स पायात् ||8||

आगत्य योच्चैर्हरिनाभिपद्मं
ददर्श तत्राशु करेण तच्च |
उद्धर्तुमिच्छन्विधिवादवाक्यं
मुमोच भूत्वा चतुरो गणेशः ||9||

निरंतरं संस्कृतदानपट्टे
लग्नां तु गुंजद्भ्रमरावलीं वै |
तं श्रोत्रतालैरपसारयंतं
स्मरेद्गजास्यं निजहृत्सरोजे ||10||

विश्वेशमौलिस्थितजह्नुकन्या
जलं गृहीत्वा निजपुष्करेण |
हरं सलीलं पितरं स्वकीयं
प्रपूजयन्हस्तिमुखः स पायात् ||11||

स्तंबेरमास्यं घुसृणांगरागं
सिंदूरपूरारुणकांतकुंभं |
कुचंदनाश्लिष्टकरं गणेशं
ध्यायेत्स्वचित्ते सकलेष्टदं तं ||12||

स भीष्ममातुर्निजपुष्करेण
जलं समादाय कुचौ स्वमातुः |
प्रक्षालयामास षडास्यपीतौ
स्वार्थं मुदेऽसौ कलभाननोऽस्तु ||13||

सिंचाम नागं शिशुभावमाप्तं
केनापि सत्कारणतो धरित्र्यां |
वक्तारमाद्यं नियमादिकानां
लोकैकवंद्यं प्रणमामि विघ्नं ||14||

आलिंगितं चारुरुचा मृगाक्ष्या
संभोगलोलं मदविह्वलांगं |
विघ्नौघविध्वंसनसक्तमेकं
नमामि कांतं द्विरदाननं तं ||15||

हेरंब उद्यद्रविकोटिकांतः
पंचाननेनापि विचुंबितास्यः |
मुनीन्सुरान्भक्तजनांश्च सर्वा-
-न्स पातु रथ्यासु सदा गजास्यः ||16||

द्वैपायनोक्तानि स निश्चयेन
स्वदंतकोट्या निखिलं लिखित्वा |
दंतं पुराणं शुभमिंदुमौलि-
-स्तपोभिरुग्रं मनसा स्मरामि ||17||

क्रीडातटांते जलधाविभास्ये
वेलाजले लंबपतिः प्रभीतः |
विचिंत्य कस्येति सुरास्तदा तं
विश्वेश्वरं वाग्भिरभिष्टुवंति ||18||

वाचां निमित्तं स निमित्तमाद्यं
पदं त्रिलोक्यामददत्स्तुतीनां |
सर्वैश्च वंद्यं न च तस्य वंद्यः
स्थाणोः परं रूपमसौ स पायात् ||19||

इमां स्तुतिं यः पठतीह भक्त्या
समाहितप्रीतिरतीव शुद्धः |
संसेव्यते चेंदिरया नितांतं
दारिद्र्यसंघं स विदारयेन्नः ||20||

इति श्रीरुद्रयामलतंत्रे हरगौरीसंवादे उच्छिष्टगणेशस्तोत्रं |